तस्यां मे स्नपनं कुर्य्यान्महास्नानविधानतः ॥
ज्येष्ठायां प्रातःस्नानकाले ब्रह्मणा सहितस्य माम् ।
रामं सुभद्रां संस्नाप्य मम लोकमवाप्नुयात् ॥”
इति तिथ्यादितत्त्वम् ॥
अन्यत् यात्राशब्दे द्रष्टव्यम् ॥
स्नानीयं, त्रि, (स्नात्यनेनेति । स्ना + करणे अनी-यर् । यद्वा, स्नानाय हितम् । स्नान + छः ।) स्नानयोग्यम् । स्नानसम्पादकद्रव्यम् । यथा,—
“गङ्गादीनाञ्च तीर्थानां वारि कुम्भप्रपूरितम् ।
स्नानीयं ते प्रयच्छामि स्नानं कुरु विलोचने ॥”
इति दुर्गोत्सवपद्धतिः ॥
स्नायी, [न्] त्रि, (स्नातीति । स्ना + णिनिः ।) स्नानकर्त्ता । यथा, तिथ्यादितत्त्वे ।
“प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुणौ ॥”
स्नायुः, स्त्री, (स्ना + बाहुलकात् उण् । “आतो-युक् चिण्कृतोः ।” ७ । ३ । ३३ । इति युक् । इत्युणादिवृत्तौ उज्ज्वलः । १ । १ ।) वायुवाहिनी नाड़ी । नहर इति ख्याता । इति भरतः ॥ तत्पर्य्यायः । वस्नसा २ इत्यमरः । २ । ६ । ६६ ॥ स्नसा ३ नसा ४ । इति राजनिर्घण्टः ॥ स तु गर्भस्थस्य सप्तभिर्मासैर्भवति । इति मुग्धबोधः ॥ (यथा, याज्ञवल्क्यः । ३ । १०० ।
“शिराः शतानि सप्तैव नवस्नायुशतानि च ॥”
“नवस्नायुशतानि तासां शाखासु षट्शतानि । द्वे शते त्रिंशच्च कोष्ठे । ग्रीवां प्रत्यूर्द्ध सप्ततिः ॥ एकैकस्यान्तु पादाङ्गुल्यां षट्निचितास्तास्त्रिंशत् तावत्य एव तलकूर्च्चगुल्फेषु । तावत्य एव जङ्घायाम् । दशजानुनि । चत्वारिंशदूरौ । दश वङ्क्षणे । शतमध्यर्द्धमेवमेकस्मिन् सक्थ्नि भवन्ति । एतेनेतरसक्थि बाहू च व्याख्यातौ । षष्टिः कट्याम् । अशीतिः पृष्ठे । पार्श्वयोः षष्टिः । उरसि त्रिंशत् ॥ षट्त्रिंशद्ग्रीवायाम् मूर्द्ध्नि चतुस्त्रिंशत् । एवं नव स्नायुशतानि व्याख्यातानि । भवन्ति चात्र ।
स्नायुश्चतुर्व्विधा विद्यात्तास्तु सर्व्वा निबोध मे ।
प्रतानवत्यो वृत्ताश्च पृथ्व्यश्च सुषिरास्तथा ॥
प्रतानवत्यः शाखासु सर्व्वसन्धिषु चाप्यथ ।
वृत्तास्तु कण्डराः सर्व्वा विज्ञेया कुशलैरिह ॥
आमपक्वाशयान्तेषु वस्तौ च शुषिराः खलु ।
पार्श्वोरसि तथा पृष्ठे पृथुलाश्च शिरस्यथ ॥
नौर्य्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता ।
भारक्षमा भवेदप्सु नृयुक्ता सुसमाहिता ।
एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः ॥
स्नायुभिर्बहुभिर्बद्धास्तेनभारसहा नराः ।
न ह्यस्थीनि न वा पेश्यो न शिरा न च सन्धयः ॥
व्यापादितास्तथा हन्युर्यथा स्नायुः शरीरिणम् ॥
यः स्नायुः प्रविजानाति वाह्याश्चाभ्यन्तरास्तथा
गूढं स शल्यमाहर्त्तुं देहाच्छक्नोति देहिनाम् ॥”
इति सुश्रुते शरीरस्थाने पञ्चमेऽध्याये ॥)
स्नायुर्मं, [न्] क्ली, नेत्ररोगप्रभेदः । तस्य लक्षणं यथा
“स्थिरं प्रस्तारि मांसाढ्यं शुष्कं स्नायुर्मपञ्चमम् ॥”
इतिमाधवकरः ॥ अन्यत् नेत्ररोगशब्दे द्रष्टव्यम्

स्नावा, [न्] पुं, (स्ना + “स्नामदिपद्यर्त्तीति ।” उणा॰ ४ । ११२ । इति वनिप् ।) स्नायुः । इति केचित् ॥ (यथा, वाजसनेयसंहितायाम् ३९ । १० ।
“मांसेभ्यः स्वाहा स्नावभ्यः स्वाहा ॥”
“स्नवभ्यः स्नावानः स्नायवो नसाः ।” इति तद्भाष्यम् ॥ * ॥ त्रि, रसिकः । इत्युणादिवृत्तौ उज्ज्वलदत्तः ॥)
स्निग्धं, क्ली, (स्निह + क्तः ।) सिक्थकम् । इति राजनिर्घण्टः ॥
स्निग्धः, पुं, (स्निह्यति स्नेति । स्निह + अकर्म्मक-त्वात् कर्त्तरि क्तः ।) वयस्यः । इत्यमरः । २ । ८ । १२ ॥ रक्तैरण्डः । सरलवृक्षः । इति राज-निर्घण्टः ॥
स्निग्धः, त्रि, (स्निह + क्तः ।) स्नेहयुक्तः । मसृणः । (यथा, महाभारते । १ । १५३ । ८ ।
“अष्टौ दंष्ट्राः सुतीक्ष्णाग्याश्चिरस्यापातदुःसहाः देहेषु मर्ज्जयिष्यामि स्निग्धेषु पिशितेषु च ॥”) तत्पर्य्यायः । चिक्कणम् २ मसृणम् ३ । इत्य-मरः । २ । ८ । ४६ ॥ भास्मृष्टम् ४ चिक्कम् ५ चक्कणम् ६ । इति वैश्यवर्गे शब्दरत्नावली ॥
“स्निग्धन्तु वत्सले वत्सः स्नेहयुक्तजने भवेत् ।”
इति च विशेष्यनिघ्नवर्गे शब्दरत्नावली ॥
स्निग्धतण्डुलः, पुं, (स्निग्धस्तण्डुलः ।) षष्टिशालिः । इति राजनिर्घण्टः ॥
स्निग्धता, स्त्री, (स्निग्धस्य भावः । तल् ।) प्रियता । यथा,—
“हार्दं प्रियत्वं प्रियता स्निग्धतायां निगद्यते ।”
इति शब्दरत्नावली ॥
स्नेहः । इति राजनिर्घण्टः ॥
स्निग्धदारुः, पुं, (स्निग्धं चिक्कणं दारु काष्ठं यस्य ।) सरलवृक्षः । इति जटाधरः । देवदारुः । इति राजनिर्घण्टः ॥
स्निग्धपत्रकः, पुं, (स्निग्धानि पत्रानि यस्य । कप् ।) गजरत्नम् । हृतकरञ्जः । गुच्छकरञ्जः । इति राजनिर्घण्टः ॥
स्निग्धपत्रा, स्त्री, पुं, (स्निग्धं पत्रं यस्याः ।) बदरी ॥ इति जटाधरः ॥ पालक्यम् । काश्मरी । इति राजनिर्घण्टः ॥
स्निग्धपिण्डीतकः, पुं, (स्निग्धः पिण्डीतकः ।) मदनवृक्षविशेषः । यथा,—
“वाराहोऽन्यः कृष्णवर्णो महापिण्डीतको महान् स्निग्धपिण्डीतकश्चान्यः स्थूलवृक्षफलस्तथा ॥ अन्यौ च मदनौ श्रेष्ठौ कटुतिक्तरसान्वितौ । छर्द्दनौ कफहृद्रोगपक्वामाशयशोधनौ ॥”
इति राजनिर्घण्टः ॥
स्निग्धफला, स्त्री, (स्निग्धं फलं यस्याः । नाकुली । इति राजनिर्घण्टः ॥
स्निग्धा, स्त्री, (स्निग्ध + टाप् ।) मेदा । इति राजनिर्घण्टः ॥
स्निट, क स्नेहे । इति कविकल्पद्रुमः ॥ (चुरा॰-पर॰-अक॰-सेट् ।) क, स्नेटयति । इति दुर्गा-दासः ॥

स्नुः, पुं, (स्नु प्रस्रवणे + मितद्र्वादित्वात् डुः ।) सानुः । पर्व्वतस्य समभूभागः । इत्यमरः । २ । ३ । ५ ॥
स्नुः, स्त्री, (स्नु + डुः ।) स्नायुः । यथा,—
“त्रिष्टुप् मांसात् स्नुतोऽनुष्टुप् जगत्यस्थ्नः प्रजापतेः ।
तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः ॥”
इति श्रीभागवते । ३ । । १२ । २८ ॥
स्नुक्, [ह्] स्त्री, (स्नुह + क्विप् ।) स्नुहीवृक्षः । इत्यमरः । २ । ४ । ५ ॥
स्नुक्छदः, पुं, चीरकञ्चुकीवृक्षः । इति रत्नमाला ॥
स्नुतः, त्रि, (स्नु + क्तः ।) क्षरितजलादिः । इत्य-मरः । ३ । १ । ९२ ॥ (सिक्तः । यथा, भाग-वते । १ । ११ । ३० ।
“ताः पुत्त्रमङ्कमारोप्य स्नेहस्नुतपयोधराः ।
हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥”)
स्नुषा, स्त्री, (स्नौति स्नेहो यस्यामिति । स्नु प्रस्र-वने + “स्नुव्रश्चिकृत्यृषिभ्यः कित् ।” उणा॰ ३ । ६६ । इति सः । स च कित् ।) पुत्त्रवधूः । इत्यमरः । २ । ६ । ९ ॥ (यथा, रघुः । ८ । १४ ॥
“स किलाश्रममन्त्यमाश्रितो
निवसन्नावसथे पुराद्वहिः ।
समुपास्यत पुत्त्रभोग्यया
स्नुषयेवाविकृतेन्द्रियः श्रिया ॥”)
श्वश्र्वा सह तस्या विरोधकारणं श्वश्रूशब्दे द्रष्टव्यम् ॥ स्नुहीवृक्षः । इति शब्दचन्द्रिका ॥
स्नुहा, स्त्री, (स्नुह + भागुरिमते टाप् । स्नुही-वृक्षः इत्यमरटीकायां भरतः । २ । ४ । १०५ ॥
स्नुहिः, स्त्री, (स्नुह + इन् ।) स्नुही । इत्यमर-टीका । २ । ४ । १०५ ॥
स्नुही, स्त्री, (स्नुहि + कृदिकारादिति ङीष् ।) वृक्षविशेषः । मनसासिज इति भाषा । तत्-पर्य्यायः । सेहुण्डः २ वज्रद्रुः ३ स्नुक् ४ गुड़ा ५ समन्तदुग्धा ६ । इत्यमरः । २ । ४ । १०५ ॥ सिंहुण्डः ७ शीहुण्डः ८ वज्रः ९ स्नुहा १० स्नुहिः ११ गुड़ो १२ गुड़ः १३ । इति तट्टीका ॥ वज्री १४ । इति शब्दरत्नावली ॥ सुधा १५ वज्रकण्टकः १६ कृष्णसारः १७ । इति जटाधरः ॥ अस्या दुग्ध-गुणाः ।
“बहुदोषे प्रयोक्तव्यमग्नितुल्यं सुधापयः ।”
इति राजवल्लभः ॥
राजनिर्घण्टोक्तपर्य्यायगुणौ सेहुण्डशब्दे द्रष्टव्यौ ॥ तत्र मनसा पूज्या । यथा,—
“सुप्ते जनार्द्दने कृष्णे पञ्चम्यां भवनाङ्गने ।
पूजयेन्मनसादेवीं स्नुहीविटपसंस्थिताम् ॥
पद्मनाभे गते शय्यां देवैः सर्व्वैरनन्तरम् ।
पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥”
इति तिथ्यादितत्त्वे देवीपुराणम् ॥
स्नेहः, पुं, (स्निह + घञ् ।) प्रेम । इत्यमरः । १ । ७ । २७ ॥ (तल्लक्षणं यथा,—
“दर्शने स्पर्शने वापि श्रवणे भाषणेऽपि वा ।
यत्र द्रवत्यन्तरङ्गं स स्नेह इति कथ्यते” ॥)